# केन्द्रीयसंस्कृतविश्वविद्यालयः
(संसदः अधिनियमेन स्थापितः)
## जयपुरपरिसरः
त्रिवेणीनगरम्, जयपुरम्

# Central Sanskrit University
(Established by an Act of Parliament)
## Jaipur Campus
Triveni Nagar, Jaipur

## ज्योतिषशास्त्रविद्याशाखा
## द्विदिवसीया राष्ट्रियसंगोष्ठी
## विषयः - ज्योतिषशास्त्रदृशा निर्वाचनप्रक्रियायाः विश्लेषणम्
पिङ्गल-माघ-कृष्ण-चतुर्थी-पञ्चमी

## Department of Jyotisha
## A Two Day National Seminar on the topic
# Critical Astrological Analysis of Election Process
**29th to 30th January 2024**



**Chief Patron**
## Prof. Shrinivasa Varakhedi
**Hon'ble Vice Chancellor**





**Prof. Sudesh Kumar Sharma**
Director CSU, Jaipur Campus
Dean of School of Contemporary
Knowledge Systems & Humanities

**Prof. Ishwar Bhat**
Head, Dept. of Jyotisha
& Director IQAC
CSU, Jaipur Campus

सर्वेन्द्रियेषु यथा नयनं प्रधानं वरीवर्ति तथैव वेदाङ्गेषु ज्योतिषं नितरां प्राधान्यं भजते। वेदकालादारभ्य अद्यावधि अस्य शास्त्रस्य महत्त्वम् उपयोगिता च सार्वकालिकं सार्वदेशिकञ्च वर्ततेति समेषां विदुषाम् अनुभवसाक्षिकोऽयं विषयः। सन्ति बहवो विषयाः निरुपिता त्रिस्कन्धात्मके ज्योतिषे । भूतभाविभवत्तोपाधिभेदत्रयस्य जगतः शुभाशुभनिरुपणे प्रवृत्तेऽस्मिन् ज्योतिषशास्त्रे होरास्कन्धः व्यष्टिगतफलचिन्तने प्रवर्तितोऽस्तीति न काऽपि विप्रतिपत्तिः। अनाद्यन्तोऽपि इदं जगत् ग्रहगत्या परिच्छिन्नत्वात् जगति जायमानानां सर्वेषां शुभाशुभफलानां परिपाकस्य सम्यक् समीक्षणम् अस्य स्कन्धस्य सकाशाद् परिचिन्त्यते अनुमीयते च। वस्तुतः होरास्कन्धे निर्वाचनप्रक्रियामुररीकृत्य स्वातंत्र्येण विषयाः न विमृष्टाः सन्ति। परन्तु प्रजातन्त्रात्मकव्यवस्थाया अङ्गभूतस्य निर्वाचनस्य वैज्ञानिकं विश्लेषणं ज्योतिषशास्त्रदृष्ट्या अवश्यं करणीयमस्ति। विशिष्य प्रजातन्त्रात्मके राष्ट्रे निर्वाचनं महत्वपूर्णस्थानं भजते इत्यत्र न कापि विप्रतिपत्तिः। इदं निर्वाचनं केषाञ्चन वृत्तिः, अन्येषां प्रवृत्तिः, इतरेषां क्रीडेव। केचन तु इदमनिवार्यम् अपरिहार्यम् इति च भावयन्ति। प्रजातन्त्रात्मके अस्मिन् राष्ट्रे सामान्यजनोऽपि चितः सन् अत्युन्नतस्थानं पदवीं च अधिरोढुमर्हति। अत्र मूलं कारणं नाम भारतीया साम्प्रतिकी निर्वाचनपद्धतिः । अस्यां पद्धतौ यः कोऽपि प्रजातन्त्रव्यवस्थायां निर्वाचनप्रक्रियां सम्मुखीकृत्य बहुमतम् अवाप्य सत्तारूढः भवितुं शक्नोति। यः प्रबलः सः जेष्यति इत्यपि धारणा जनमानसे वर्तते। यदि चितः योग्यः प्रामाणिकः चास्ति तर्हि लोकप्रियः भविष्यति। अधिकारबलं, जातिबलं, धनबलम्, इत्येतैः सह पदाकाङ्क्षिणः सामाजिकस्तरोऽपि निर्वाचनं प्रभावयति। परं जयपराजययोः निर्धारकं तत्त्वं किम् इति विश्लेषणं कष्टसाध्यम् एव। क्वचित् यत्ने कृते अपि मानवः निर्वाचने अभीष्टं परिणामं प्राप्तुं न प्रभवति। अत्र को हेतुः? इति जिज्ञासायाम् अदृष्टा अपूर्वा वा काचित् शक्ति इति उच्यते। केचन भाग्यं, दिष्टम् इत्यपि वदन्ति। **'सर्वम् अपहाय चिन्त्य भाग्यर्क्ष्यं प्राणिनां विशेषेण'** इति अभियुक्तिः प्रसिद्धा अस्ति। भाग्यमपि अनुकूलप्रतिकूलभेदेन द्विविधम्। यदि भाग्यमनुकूलमस्ति तर्हि मनुजकृतानि सर्वाणि कार्याणि सफलानि भवन्ति। यदि भाग्यं प्रतिकूलं वर्तते तर्हि सर्वमपि मनुजकृतानि विफलानि भवन्ति। मन्दभाग्यस्य बुद्धिः अपि शिथिला भवति। भाग्यस्य निर्धारणं कथं करणीयम् इति ज्यौतिषे शास्त्रे उक्तं वर्तते। तस्मात् जन्मकुण्डल्यां (जातके) विद्यमानग्रहाणां बलाबलपरीक्षणेन निर्वाचनस्यापि अवश्यं चिन्तनं कर्तव्यमस्ति। वस्तुतः समग्रस्य राष्ट्रस्य राजनैतिकदृष्ट्या जनजीवनदृष्ट्या च निर्वाचनं प्रधानं वर्तते। परम् अधिकारप्रियाणां राजनेतृणां कृते निर्वाचनं प्राणाः इव आभान्ति। निर्वाचने चयनाभावे राजनैतिकपदप्राप्तिः अधिकारप्राप्तिः वा न सम्भवति। अतः निर्वाचनमेव अधिकारमूलमस्ति। तस्मात् प्रजातन्त्रात्मकव्यवस्थायाः अङ्गभूतस्य निर्वाचनस्य वैज्ञानिकविश्लेषणं ज्यौतिषशास्त्रस्य दृष्ट्या अवश्यम् अनुसन्धातव्यमस्तीति अस्माभिरभ्युपगन्तव्यम्।

ज्यौतिषदृशा निर्वाचने जयपराजययोः चिन्तनप्रसङ्गे अधोलिखिताः बिन्दवः प्रधानाः सन्ति। ते च यथा-

१. अभ्यर्थिनः व्यक्तित्वम्, तदीयः सामाजिकस्तरः।

२. दलस्य (पक्षस्य) सङ्घटनस्य च प्रभावः।

३. दलस्य (पक्षस्य) दलनायकस्य प्रभावः ।

४. जातिवर्गयोः प्रभावः।

५. निर्वाचनावसरे प्रचारप्रसारयोः प्रभावः ।

६ अभ्यर्थिनः आर्थिकस्तरः ।

७. अभ्यर्थिनः विशिष्टानां कार्याणां प्रभावः।

८. निर्वाचनावसरे स्थानीयानां राष्ट्रियाणां च समस्यानां परिणामः ।

९. निर्वाचनावसरे समसामयिकसमस्याः ।

१०. निर्वाचनावसरे सङ्घटनस्य प्रभावः।

११. निर्वाचनावसरे राजनैतिकम् एकीकरणम्।

ग्रहाणां स्थितिभेदेन विशिष्य ज्यौतिषे शास्त्रे सप्तविधाः नेतारः (नायकाः) भणिताः सन्ति। यथा -

१. आजन्मनायकः

२. वंशपरम्परागतः नायकः

३. परिसरप्रभावितः नायकः

४. स्वयं घोषितः नायकः

५. घटनाधारितः नायकः

६. कृतसन्धिः नायकः

७. यथावसरनायकः

ज्यौतिषशास्त्रस्य दृष्ट्या लग्नं, लग्नाधिपतिः, रविः, चन्द्रश्चेति चत्वारि प्रधानानि कारणानि नायकत्वप्रदाने हेतवः सन्ति। अमीषां संयोगवियोगादिकं नायकत्वं प्रभावयति। एवम् अभ्यर्थिनां कुण्डल्यां विद्यमानानां ग्रहाणां बलाबलादिकं परिशीलयामः चेत्तर्हि कथं कीदृशं च यशः पदं च लभ्यते इति वक्तुं शक्यते। तत्रापि ग्रहाणां दशाः अत्यन्तं प्रधानाः भवन्ति फलचिन्तने। एवं लोककल्याणदृष्ट्या निर्वाचनस्य विश्लेषणं ज्यौतिःशास्त्रस्य दृष्ट्या कर्तुं शक्यते। निर्वाचनस्य वैज्ञानिकं विश्लेषणं ज्यौतिषशास्त्रस्य दृष्ट्या करणेन प्रजातन्त्रव्यवस्थां सुदृढां सम्पादयितुं शक्नुमः। ज्यौतिषम् एकं सर्वशास्त्रोपकारकं लोकोपकारकं च शास्त्रं विद्यते। इदं कालविधानशास्त्रम् इत्यपि कथ्यते। न केवलं यज्ञयागादीनां कालस्य अपि तु निर्वाचनकालस्यापि ज्ञानम् अनेन सम्भवति। यथोक्तं लगधमुनिना -

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्व्या विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान् ॥

(वे.ज्यो. श्लो.-3)

इत्थं ज्यौतिषशास्त्रस्याधारेण निर्वाचनप्रक्रियायाः विश्लेषणम् इत्याख्यः निर्धारितसङ्गोष्ठीविषयः सुतरां लोककल्याणाय वर्तते। तस्मात् अधोनिर्दिष्टशीर्षकमवलम्ब्य विदुषां विदुषीनां शोधच्छात्राणां च शोधपत्राण्यपेक्षितानि।

**(उपविषयाः)**

१. राष्ट्रस्तरीयं निर्वाचनम् ।
२. स्थानीयसहकारिसङ्घादिषु निर्वाचनम्।
३. शैक्षिकसङ्घसंस्थासु निर्वाचनम्।
४. धार्मिक- सांस्कृतिक सामाजिकसेवासंस्थासु निर्वाचनम् ।
५. कर्मचारिणां सङ्घसंस्थासु अधिकारवर्गेषु च निर्वाचनम् ।
६. आजन्मनायकः
७. वंशपरम्परागतः नायकः
८. परिसरप्रभावितः नायकः
९. स्वयं घोषितः नायकः
१०. घटनाधारितः नायकः
११. कृतसन्धिः नायकः
१२. यथावसरनायकः

एतेषु विषयेषु कश्चिदेकं शीर्षकमाश्रित्य शोधपत्रं समर्पयितुं शक्यते।

**शोधसारप्रेषणस्य अन्तिमा तिथिः - २७.०१.२०२४**
**पूर्णशोधपत्रप्रेषणस्य अन्तिमा तिथिः - २८.०१.२०२४**

❖ फोन्ट हिन्दी/संस्कृतम् - कृतिदेव ०१०/मंगल (Unicode), अक्षरा १४, पंक्तिः - अन्तराल : १.५

❖ शोधपत्रस्य मृदुप्रतिं (Soft Copy) प्रेषयितुं वैद्युतीयसम्पर्कसूत्रम्
email: jyotishdeptcsu@gmail.com

सम्पर्कसूत्रम् -

| | | |
|---|---|---|
| Prof. Ishwar Bhat, | 7976639119, | prof.ishwar.bhat@csu.co.in, |
| Dr. Vishnu Nirmal, | 7751955953, | dr.vishnu.nirmal@csu.co.in |
| Dr. Rameshwar Sharma, | 9414440220, | dr.rameshawar.sharma@csu.co.in |


प्रतिभागिनः पञ्जीकरणशुल्कं रु. ५००/-सङ्गोष्ठ्या आयोजनस्थले एव प्रदाय पञ्जीकरणप्रपत्रं पूरयितुमर्हन्ति।

सङ्गोष्ठीसंयोजकः
**प्रो. ईश्वरभट्टः**

निदेशकः
**प्रो. सुदेशकुमारशर्मा**